# Prajnaparamita Stotram

# પ્રજ્ઞાપારમિતાસ્તોત્રમ્

## Document Information

Text title : Prajnaparamita Stotram

File name : prajnApAramitAstotram.itx

Category : devii, devI, buddha, stotra

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,
Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# પ્રજ્ઞાપારમિતાસ્તોત્રમ્

ૐ નમઃ શ્રીપ્રજ્ઞાપારમિતાયૈ ।
નિર્વિકલ્પે નમસ્તુભ્યં પ્રજ્ઞાપારમિતેઽમિતે ।
યા ત્વં સર્વાનવદ્યાઙ્ગિ નિરવદ્યૈર્નિરીક્ષ્યસે ॥ ૧॥

આકાશમિવ નિર્લેપાં નિષ્પ્રપઞ્ચાં નિરક્ષરામ્ ।
યસ્ત્વાં પશ્યતિ ભાવેન સ પશ્યતિ તથાગતમ્ ॥ ૨॥

તવ ચાર્યે ગુણાઢ્યાયા બુદ્ધસ્ય ચ જગદ્ગુરોઃ ।
ન પશ્યન્ત્યન્તરં સન્તશ્ચન્દ્રચન્દ્રિકયોરિવ ॥ ૩॥

કૃપાત્મકાં પ્રપદ્ય ત્વાં બુદ્ધધર્મપુરસ્સરામ્ ।
સુખેનાયાન્તિ માહાત્મ્યમતુલં ભક્તવત્સલે ॥ ૪॥

સકૃદપ્યાશયે શુદ્ધે યસ્ત્વાં વિધિવદીક્ષ્યતે ।
તેનાપિ નિયતં સિદ્ધિઃ પ્રાપ્યતેઽમોઘદર્શને ॥ ૫॥

સર્વેષામપિ વીરાણાં પરાર્થે નિયતાત્મનામ્ ।
વ્યાપિકા જગતીમેનાં માતા ત્વમસિ વત્સલા ॥ ૬॥

યે બુદ્ધા લોકગુરવઃ પુત્રાસ્તવ કૃપાલવઃ ।
તેન ત્વમસિ કલ્યાણિ સર્વસત્ત્વપિતામહી ॥ ૭॥

સર્વપારમિતાભિસ્ત્વં નિર્મલાભિરનિન્દિતા ।
ચન્દ્રલેખેવ તારાભિરનુપ્રોતાઽસિ સર્વતઃ ॥ ૮॥

વિનેયજનમાસાદ્ય તત્ર તત્ર તથાગતૈઃ ।
બહુરૂપા ત્વમેવૈકા નાનાનામભિરીક્ષ્યસે ॥ ૯॥

પ્રભાં પ્રાપ્યેવ દીપ્તાંશોરવશ્યાયોદવિન્દવઃ ।
ત્વાં પ્રાપ્ય પ્રલયં યાન્તિ દોષાવાદાશ્ચ વાદિનામ્ ॥ ૧૦॥

ત્વમેવ ત્રાસજનની બાલાનાં ભીમદર્શના ।

આશ્વાસજનની ચાપિ વિદુષાં સૌમ્યદર્શના ॥ ૧૧॥

યસ્ય ત્વય્યપ્યભિષ્વઙ્ગસ્ત્વન્નાથસ્ય ન વિદ્યતે ।
તસ્યામ્બ! કથમન્યત્ર રાગદ્વેષૌ ભવિષ્યતઃ ॥ ૧૨॥

નાગચ્છસિ કુતશ્ચિત્ત્વં કુત્રચિન્ન ચ ગચ્છસિ ।
સ્થાનેષ્વપિ ચ સર્વેષુ વિદ્વદ્ભિર્નોપલભ્યસે ॥ ૧૩॥

યે ત્વામેવ ન પશ્યન્તિ પ્રપદ્યન્તે ચ ભાવતઃ ।
પ્રપદ્ય ચ વિમુચ્યન્તે તદિદં મહદદ્ભુતમ્ ॥ ૧૪॥

ત્વામેવ બધ્યતે પશ્યન્નપશ્યન્ન વિબધ્યતે ।
ત્વામેવ મુચ્યતે પશ્યન્નપશ્યન્ન વિમુચ્યતે ॥ ૧૫॥

અહો વિસ્મયનીયાસિ ગમ્ભીરાસિ યશસ્વિની ।
સુદુર્બોધાસિ માયેવ દૃશ્યસે ન ચ દૃશ્યસે ॥ ૧૬॥

બુદ્ધૈઃ પ્રત્યેકબુદ્ધૈશ્ચ શ્રાવકૈશ્ચ નિષેવિતે ।
માર્ગસ્ત્વમેકો મોક્ષસ્ય નાસ્ત્યન્ય ઇતિ નિશ્ચયઃ ॥ ૧૭॥

વ્યવહારં પુરસ્કૃત્ય પ્રજ્ઞપ્ત્યર્થં શરીરિણામ્ ।
કૃપયા લોકનાથૈસ્ત્વમુચ્યસે ચ ન ચોચ્યસે ॥ ૧૮॥

શક્તઃ કસ્ત્વામિહ સ્તોતું નિર્નિમિત્તાં નિરઞ્જનામ્ ।
સર્વેષાં વિષયાતીતા યા ત્વં ક્વચિદનિશ્રિતા ॥ ૧૯॥

સત્યેવમપિ સંવૃત્યા વાક્યાર્થૈર્વયમીદૃશૈઃ ।
ત્વામસ્તુત્યામપિ સ્તુત્વા તુષ્ટુવન્તઃ સુનિર્વૃતાઃ ॥ ૨૦॥

પ્રજ્ઞાપારમિતાં સ્તુત્વા યન્મયોપચિતં શુભમ્ ।
તેનાસ્ત્વાશુ જગત્ કૃત્સ્નં પ્રજ્ઞાપારપરાયણમ્ ॥ ૨૧॥

ઇતિ શ્રીલક્ષ્માભગવતી કૃતં પ્રજ્ઞાપારમિતાસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Prajnaparamita Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*